# Shivaproktam Kalahastishvaramahimavarnanam

# શિવપ્રોક્તં કાલહસ્તીશ્વરમહિમવર્ણનમ્

## Document Information

Text title : Shivaproktam Kalahastishvaramahimavarnanam

File name : kAlahastIshvaramahimavarNanamshivaproktaM.itx

Category : shiva, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 19 | 85-93, 122-129||

Latest update : April 28, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 28, 2024

*sanskritdocuments.org*

# શિવપ્રોક્તં કાલહસ્તીશ્વરમહિમવર્ણનમ્

- શિવપાર્તવતીસંવાદે -
પશ્ચિમાભિમુખં લિઙ્ગં કાલહસ્તીશ્વરં મુદા ।
સ્મૃત્વાપિ સર્વપાપેભ્યો મુક્તો ભવતિ સર્વથા ॥ ૮૫॥

પશ્ચિમાભિમુખં લિઙ્ગં શેષાકારમનુત્તમમ્ ।
બિલ્વપત્રૈઃ સમભ્યર્ચ્ય પ્રયાતિ મમ સન્નિધિમ્ ॥ ૮૬॥

ન દૃષ્ટં યેન તલ્લિઙ્ગં તસ્ય જન્મ નિરર્થકમ્ ।
નાર્ચિતં યેન તલ્લિઙ્ગં જીવન્નપિ મૃતો હિ સઃ ॥ ૮૭॥

દ્રષ્ટવ્યોઽતિપ્રયત્નેન કાલહસ્તીશ્વરો મુદા ।
યષ્ટવ્યો બિલ્વપત્રાદ્યૈઃ સંસારભયનાશકઃ ॥ ૮૮॥

શ્રીમદ્દક્ષિણકૈલાસે સર્વે બ્રહ્માદયઃ સુરાઃ ।
તિષ્ઠન્તિ દેવદેવેશં મામભ્યર્ચ્યાન્વહં મુદા ॥ ૮૯॥

નિત્યં શ્રીકાલહસ્તીશં યોઽનુસેવિતુમિચ્છતિ ।
સ મદીયો ગણો જ્ઞેયો મમ પ્રિયકરશ્ચ સઃ ॥ ૯૦॥

પ્રાણવિશ્લેષસમયે કાલહસ્તીશ્વરેતિ મામ્ ।
યઃ સ્મરિષ્યતિ ભાગ્યેન તસ્મૈ મોક્ષં દદામ્યહમ્ ॥ ૯૧॥

યં યં કામયતે કામં પ્રાણવિશ્લેષણક્ષણે ।
તસ્મિન્ ક્ષેત્રવરે દેવિ તં તં કામં સ વિન્દતિ ॥ ૯૨॥

તન્મોક્ષદં કામદં ચ તત્તુ ક્ષેત્રમનુત્તમમ્ ।
અત એવ હિ તત્ક્ષેત્રં સેવનીયં પ્રયત્નતઃ ॥ ૯૩॥

પશ્ચિમાભિમુખં લિઙ્ગમિદમત્યન્તદુર્લભમ્ ।
એતસ્ય દર્શનં નૈવ વિના બહુતપસ્યયા ॥ ૧૨૨॥

કાલહસ્તીશ્વરં લિઙ્ગં પશ્ચિમાભિમુખં પરમ્ ।

સ્વયં યત્નેન મહતાભ્યર્ચનીયં નરૈઃ સદા ॥ ૧૨૩॥

સર્વેષાં મુક્તિદાનાર્થમાવિર્ભૂતોઽત્ર શઙ્કરઃ ।
કાલહસ્તીશ્વરં લિઙ્ગં બિલ્વપત્રૈર્જલાપ્લુતૈઃ ॥ ૧૨૪॥

યઃ પૂજયતિ સદ્ભક્ત્યા નં તસ્ય નરકાદ્ભયમ્ ।
શાઙ્કરેભ્યોઽત્ર દુગ્ધાન્નં શર્કરાઘૃતસંયુતમ્ ॥ ૧૨૫॥

દેયમત્યન્તયત્નેન શિવપ્રીત્યર્થમાદરાત્ ।
યત્ર કુત્રાપિ યત્નેન ભોજિતેઽપિ શિવાર્ચકે ॥ ૧૨૬॥

તત્રાપિ શઙ્કરઃ પ્રીતો ભવત્યેવ ન સંશયઃ ।
યદ્યત્ર શાઙ્કરો ભક્ત્યા (પૂ)ભોજ્યતે શઙ્કરાર્ચકઃ ॥ ૧૨૭॥

તદાત્વત્યન્તસન્તુષ્ટો ભવેત્સામ્બઃ સદાશિવઃ ।
અત્રાલ્પમપિ ચેજ્જપ્તં તદાનન્ત્યાય કલ્પતે ॥ ૧૨૮॥

ભૂરિપુણ્યપ્રભાવેણ પ્રાપ્યતે ક્ષેત્રમીદૃશમ્ ।
અસ્માભિરતિયત્નેન સ્થાતવ્યમિહ શાઙ્કરૈઃ ॥ ૧૨૯॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે શિવપ્રોક્તં કાલહસ્તીશ્વરમહિમવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૧૯ । ૮૫-૯૩, ૧૨૨-૧૨૯॥

- .. shrIshivarahasyam ugrAkhyaH saptamAMshaH . adhyAyaH 19 . 85-93, 122-129 ..

Notes:
Śiva શિવ, having narrated to Pārvatī પાર્વતી, the story of the past lives of The Elephant (Hasti હસ્તિ) and The Serpent (Kāla કાલ), who worshipped Him at the West-facing Śivaliṅgaપશ્ચિમાભિમુખં શિવલિઙ્ગમ્, describes the merits of remembering, visiting and worshiping at the Kālahastīśvara kṣetra કાલહસ્તીશ્વર ક્ષેત્ર.

Encoded and proofread by Ruma Dewan

*Shivaproktam Kalahastishvaramahimavarnanam*

pdf was typeset on April 28, 2024

Please send corrections to *sanskrit@cheerful.com*